# संस्कृत-वार्ता:

दिनाङ्क : 21/02/2026 सायम् - 06:20

आदौ मुख्यवार्ता:

- भारत-ब्राजील-देशौ अग्रिमेषु पञ्चवर्षेषु द्वैपाक्षिक-व्यापारसम्बन्धाः विंशति बिलियन् यू. एस. डालर-तः अधिकाः सम्वर्धयितुं सहमतौ अभवताम्। प्रधानमन्त्री नरेन्द्रमोदी, ब्राजील्-देशस्य राष्ट्रपतिः लूयिज इनासियो लूला डा सिल्वा च राष्ट्रिय-राजधान्यां द्वैपाक्षिकं वार्तालापं कृतवन्तौ।
- गृह मंत्री अमित शाहः अवदत् यत् आगामि मासस्य एकत्रिंशत् दिनाङ्कपर्यन्तं देशात् नक्सलवादस्य उन्मूलनं भविष्यति। श्रीशाहः पूर्वोत्तरक्षेत्रे जम्मू-काश्मीरे च शान्तिं स्थापयितुं सी. आर. पी. एफ. इत्यस्य भूमिकां अपि प्रसंशितवान्।
- गोवा-समुद्रीय-सम्मेलनस्य पञ्चमं संस्करणम् अद्य गोवायां समाप्तम्। हिन्दमहासागरक्षेत्रे उद्भूतानां समुद्रीय समाह्वानान् परिहर्तुं चर्चाऽभवत् ।
- अमेरिकादेशस्य राष्ट्रपतेः डोनाल्ड ट्रम्प-वर्यस्य नूतन-वैश्विक-शुल्कस्य घोषणायां सर्वोच्चन्यायालयस्य घोषणाया: अनन्तरं भारतस्य शुल्कं अस्थायीरूपेण दश प्रतिशतं यावत् न्यूनं भविष्यतीति।
- आई. सी. सी. विंशतिं प्रति विंशति विश्वचषक-क्रीडायां सूपर-8 इति शीर्षाष्ट इत्यस्य आरम्भिके द्वन्द्वे न्यूज़ीलैंड-दलम् अद्य सायङ्काले कोलम्बो-नगरे पाकिस्तान दलं सम्मुखी करिष्यति ।

---------------------------------------------

भारत-ब्रजील

अद्य नवदिल्ल्यां भारत-ब्राजील-देशौ डिजिटल-सहभागित्वम्, दुर्लभ-भू-रत्नानां च सहकारः, एम. एस. एम. ई., तटीय-क्षेत्रम् इत्यादीनां विभिन्नेषु क्षेत्रेषु सन्धेः आदानप्रदानं कृतवन्तौ। प्रधानमन्त्री नरेन्द्रमोदी, ब्राजील्-देशस्य राष्ट्रपतिः लूयिज इनासियो लूला डा सिल्वा च राष्ट्रिय-राजधान्यां द्वैपाक्षिकं वार्तालापं कृतवन्तौ। उपवेशने, तौ द्वैपाक्षिकसम्बन्धानां सम्पूर्ण

विस्तारं समीक्षितवन्तौ। उभयोः मध्ये बहुपक्षीय-मञ्चेषु सहकारः, बहुपक्षवादस्य परिष्कारः, वैश्विक-शासनं, वैश्विक-दक्षिणसम्बद्धविषयाः इत्यादीनां परस्पर-हितानां क्षेत्रीय-वैश्विक-विषयेषु अपि विचारानां आदानप्रदानम् अभवत्।

संयुक्त-वक्तव्ये प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् राष्ट्रपतेः लुला डा सिल्वा-वर्यस्य नेतृत्वे भारत-ब्राजील-देशयोः सम्बन्धः सुदृढः अभवत् इति।

सः अवदत् यत् अग्रिमेषु पञ्चवर्षेषु द्वैपाक्षिकव्यापारसम्बन्धाः विंशति बिलियन यू. एस. डालर-तः अधिकाः भविष्यन्ति।

ततः पूर्वं राष्ट्रपतिः द्रौपदीमुर्मुः, प्रधानमन्त्री नरेन्द्रमोदी च राष्ट्रपतिभवनस्य प्राङ्गणे राष्ट्रपतेः लुला डा सिल्वा वर्यस्य औपचारिकं स्वागतं कृतवन्तौ। ब्राजील-देशस्य राष्ट्रपतिः राजघट्टे अपि गत्वा महात्मागान्धी-वर्यं श्रद्धाञ्जलिं समर्पितवान्।

---

<u>अमितशाहः/सीआरपीएफ</u>

गृहमन्त्रिणा अमितशाहेन अद्य कामरूप-मेट्रो-मण्डलस्य कचुटोली-नगरे दशमम् असम-आरक्षि-बटालियन् इत्यस्य नूतनस्य परिसरस्य शिलान्यासं कृतम्। परियोजनायाः कुलव्ययः प्रायः सार्द्ध-द्विशत-कोटिरूप्यकाणि अस्ति। अस्मिन् अवसरे जनसभां संबोधयन् केन्द्रीयः मन्त्री अवदत् यत्, राज्ये भाजपा-शासनस्य दशसु वर्षेषु विधि-व्यवस्थायाः स्थितिः सुदृढाऽभवत्, बृहती औद्योगिकसंस्थाः अधुना असम-राज्यं प्रति प्रवृत्ताः सन्ति। पूर्वं दिने केन्द्रीय-गृह-मन्त्री गुवाहाटी-नगरे सी. आर. पी. एफ. इत्यस्य सप्ताशीतितमे संस्थापनादिवसस्य पथसञ्चलने भागम् अभजत्। अस्मिन् अवसरे श्रीशाहः अवदत् यत् आगामि मासस्य एकत्रिंशत् दिनाङ्कपर्यन्तं देशात् नक्सलवादस्य उन्मूलनं कर्तुं राष्ट्रम् प्रतिज्ञां कृतवान् अस्ति। सः अवदत् यत्, सी. आर्. पी. एफ्.-सैनिकाः, कोबरा-बटालियन इत्येतौ च देशं नक्सल-मुक्तं कर्तुं अभूतपूर्वं कार्यं कुर्वन्तौ स्तः।

सः अवदत् यत्, सप्तत्यधिक-द्विशतोत्तर-द्विसहस्रं यावत् वीरसैनिकाः देशस्य सेवायां स्वप्राणान् समर्पितवन्तः। सः अवदत् यत् अस्य बलस्य सप्तशतं यावत् कर्मचारिणः केवलं उत्तर-पूर्व-भारते

एव स्वप्राणान् त्यक्तवन्तः। सः सी. आर्. पी. एफ्. सैनिकानां असाधारणस्य साहसस्य सम्मानं कृत्वा शौर्य-पदकं अपि प्रदत्तवान्। अस्मिन् अवसरे असम-राज्यस्य मुख्यमन्त्री हिमान्ता-बिश्वासरमा अपि उपस्थितः आसीत्। श्रीशाहः पूर्वोत्तरक्षेत्रे जम्मू-काश्मीरे च शान्तिं स्थापयितुं सी. आर. पी. एफ. इत्यस्य भूमिकां अपि वर्णितवान्।

---------------------------------------------

गोवा-दिनेशत्रिपाठी

नौसेनाध्यक्षेण एड्मिरल् दिनेश के. त्रिपाठिना अद्य गोवा-समुद्रीय-सम्मेलनस्य पञ्चमं संस्करणम् उद्घाटयन् समुद्रीयसहयोगस्य महत्त्वं प्रतिपादितम्। प्रतिनिधि-समूहं सम्बोधयन् नौसेना-प्रमुखः सद्यः एव विशाखापत्तनम् इत्यत्र अन्ताराष्ट्रिय-नौसेनायाः समीक्षार्थं चतुःसप्तति राष्ट्राणां समागमं तथा च मिलन् इत्यस्य नौकाश्रयस्य समुद्रस्य च समुद्रीयः महाकुम्भः इति वर्णितवान्। सः अवदत् यत् बृहदस्तरे सहभागिता वर्धमानं वैश्विक-समुद्रीय-सहभागित्वं प्रतिबिम्बयति।

---------------------------------------------

अमेरिका-शुल्क:

शुल्कस्य विषये अमेरिकादेशस्य सर्वोच्चन्यायालयस्य निर्णयस्य परिप्रेक्ष्ये, अमेरिकादेशस्य राष्ट्रपतिः डोणाल्ड् ट्रम्पः अवदत् यत् भारतेन सह व्यापार-व्यवहारे किमपि परिवर्तितं नास्ति, तथा च भारतेन सह व्यवहारः प्रचलति इति अवधानं दत्तवान्। सः अवदत् यत् भारतेन सह तस्य सम्बन्धः अद्भुतः अस्ति, ते भारतेन सह व्यापारं कुर्वन्तः सन्ति। राष्ट्रपतिः ट्रम्पः गतरात्रौ वाईट-हाऊस-मध्ये वार्ताहर-सम्मेलने इदम् उक्तवान्, यदा अमेरिकादेशस्य सर्वोच्चन्यायालयेन तस्य व्यापक-शुल्कस्य निराकरणस्य निर्णयः कृतः। अमेरिकादेशस्य राष्ट्रपतेः डोनाल्ड् ट्रम्प्-वर्यस्य नूतन-वैश्विक-शुल्कस्य घोषणायाः अनन्तरं भारतस्य शुल्कं अस्थायीरूपेण दश प्रतिशतं यावत् न्यूनं भविष्यति इति वाईट-हाऊस-अधिकारिणः स्पष्टीकृतवन्तः।

---------------------------------------------

इण्डिया-ए. आई. इंपैक्ट- घोषणा

ऐषमः षड्विंशत्यधिक द्विसहस्रतम वर्षस्य इण्डिया-ए. आई. इंपैक्ट-शिखरसम्मेलनेन ए. ऐ. प्रभाव-विषये नवदेहली-घोषणाम् अङ्गीकृतम्, यत् आर्टिफिसियल्-इन्टेलिजेन्स् इति वैश्विकसहयोगस्य महत्त्वपूर्णं सोपानम् अस्ति। आर्थिकवृद्धेः सामाजिक-कल्याणस्य च कृते ए. आई. इत्यस्य उपयोगस्य विषये विस्तृत-आधारित-वैश्विक-सर्वसम्मतिं प्रतिबिम्बयन्, आहत्य अष्टाशीति देशैः अन्ताराष्ट्रिय-सङ्घटनैः च एषा घोषणा अनुमोदिता अस्ति। ह्यः समाप्ते शिखरसम्मेलने सम्पूर्णस्य जगतः व्यापकरूपेण सहभागिता दृष्टा। 'सर्वजनहिताय, सर्वजनसुखाय' इत्यनेन सिद्धान्तेन ए. ऐ. इत्यस्य लाभाः मानवेषु समानरूपेण वितरणीयम्।

---------------------------------------------

**इण्डिया-ए. आई. इम्पैक्ट**

ह्यः नवदिल्ल्यां इण्डिया-ए. आई. इम्पैक्ट-शिखरसम्मेलने भारतीय-युवकाङ्ग्रेस-दलस्य कतिपयैः कार्यकर्तृभिः कृतस्य विरोध-प्रदर्शनस्य विषये भाजपेति दलेन अद्य काङ्ग्रेस-दलस्य निन्दा कृता। नवदिल्ल्यां वार्ताहर सम्मेलनं सम्बोधयन् केन्द्रीयमन्त्री किरेनरिजिजु-वर्यः युव-काङ्ग्रेस-कार्यकर्तृणां कृत्यस्य निन्दाम् अकरोत् यत् एतत् राष्ट्रस्य विरुद्धं अपराधः अस्ति, एतत् दोषं नास्ति। सः आरोपितवान् यत् काङ्ग्रेस्-दलं भारतस्य समृद्धिं प्रगतिं च न सहितुं शक्नोति।

---------------------------------------------

**विश्वचषक-क्रीडायां**

आई. सी. सी. विंशतिं प्रति विंशति विश्वचषक-क्रीडायां अद्य शीर्षाष्ट चरणस्य आरम्भः भविष्यति। सुपर-8 इति शीर्षाष्ट इत्यस्य आरम्भिके द्वन्द्वे न्यूज़ीलैंड-दलम् अद्य सायङ्काले कोलम्बो-नगरे पाकिस्तान दलं सम्मुखी करिष्यति। भारतीय-समयानुसारं सायं सप्तवादने स्पर्धायाः आरम्भः भविष्यति। अत्रान्तरे, भारतं श्वः अहमदाबाद-नगरे दक्षिण-आफ्रिका-दलस्य विरुद्धं स्वस्य सुपर-8 इत्याभियानस्य आरम्भं करिष्यति।

।। इति वार्ता: ।।